Roll No. : ......................................

Total No. of Questions : **12** ] [ Total No. of Printed Pages : **4**

# AFMA–145

## M.A. (Final) Examination, 2023

## SANSKRIT

Paper – IX (अ) क

**[वर्ग अ (क) साहित्य]**

**(प्राचीन काव्य)**

*Time : 3 Hours* ] [ *Maximum Marks : 100*

**खण्ड–अ** **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**खण्ड–ब** **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**खण्ड–स** **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**

**नोट** :– अस्मिन् खण्डे सर्वे प्रश्नाः समाधेयाः सन्ति। एषु यथेष्टं द्वौ प्रश्नौ संस्कृतमाध्यमेन एव उत्तरणीयौ।

1. निम्नाङ्किताः सर्वे प्रश्नाः उत्तरणीयाः। तत्र कौचित् **द्वौ** संस्कृतेन समाधेयौ स्तः।

   (i) शिशुपालवधमहाकाव्ये प्रधानरसः कः वर्तते ?

   (ii) रावणः पूर्वस्मिन् जन्मनि को नाम दैत्य आसीत् ?

(iii) क्रमेलकः केलिवनं प्रविश्य किं निरीक्षते ?

(iv) नैषधीयचरितमहाकाव्यस्य प्रधाननायकः कः वर्तते ?

(v) नैषधीयचरितस्य महाकाव्यस्य कथायाः मूलस्रोतः किम् अस्ति ?

(vi) विक्रमाङ्कदेवचरितानुसारं काव्यामृतस्य लुण्ठनाय के जनाः दैत्या इव प्रगुणीभवन्ति ?

(vii) का नाम पुरी कुरूणां राजधानी आसीत् ?

(viii) को नाम महर्षिः राजनि पाण्डौ सम्भोग सम्भेदकं शापमुत्ससर्ज ?

(ix) किरातार्जुनीयमहाकाव्ये किरातवेशे कः अर्जुनेन सह युयुधे ?

(x) रघुवंशमहाकाव्ये कस्य राजवंशस्य राज्ञां कीर्तिः वर्णिता वर्तते ?

**खण्ड–ब**

**नोट** :– अस्मिन् खण्डे सप्त (2 तः 8 यावत्) प्रश्नाः सन्ति। तेषु केचन **पञ्च** प्रश्नाः समाधेया वर्तन्ते। तत्रापि द्वितीयतृतीयौ प्रश्नौ अनिवार्यौ संस्कृतमाध्यमेन च उत्तराणीयौ स्तः।

2. अधस्तनस्य श्लोकस्य सप्रसङ्गं सान्वयञ्च संस्कृतं समाश्रित्य व्याख्या कार्या–

चयस्त्विषाभित्यव धारितं पुरा

ततः शरीरीति विभाविताकृतिम्।

विभुर्विभक्तावयवं पुमानिति,

क्रमादमुं नारद इत्यबोधि सः॥

**अथवा**

पतत्पतङ्गप्रतिमस्तपो निधिः,

पुरोऽस्य यावन्न भुवि व्यलीयत।

गिरेस्तडित्वानिव तावदुच्चकै-

र्जवेन पीठादुदतिष्ठदच्युतः॥

3. अधोलिखितस्य पद्यस्य ससन्दर्भं संस्कृतेन व्याख्या विधेया–

गृह्णन्तु सर्वे यदि वा यथेष्टं नास्ति क्षतिः कापि कवीश्वराणाम्।

रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः॥

**अथवा**

लङ्कापतेः सङ्कुचितं यशोयद् यत्कीर्तिपात्रं रघुराजपुत्रः।

स सर्व एवादिकवेः प्रभावो न कोपनीयाः कवयः क्षितीन्द्रैः॥

4. अधस्तनस्य श्लोकस्य सप्रसङ्गं व्याख्या विधेया–

तदोजसस्तद्यशसः स्थिताविमौ

वृथेति चित्ते कुरुते यदा यदा।

तनोति भानोः परिवेषकैतवात्

तदा विधिः कुण्डलनां विधोरपि॥

**अथवा**

मदेकपुत्रा जननी जरातुरा

नव प्रसूतिर्वरढा तपस्विनी।

गतिस्तयो रेष जनस्तमर्दय-

न्नहो विधे! त्वां करुणा रुणद्धि नो॥

5. अधोलिखितस्य पद्यस्य ससन्दर्भं भावार्थः प्रदर्शनीयः–

भूभुजोऽस्य सविधे विचरन्त्यो-

र्भोजमद्रसुतयोर्दृशि शोभाम्।

जेतुकाममिव सर्वसमष्ट्या

प्रादुरास पुरतो मृगयूथम्॥

**अथवा**

क्षुत्पीडया स्तनरसे कलहं शिशूनां

कुन्ती तदा शमयितुं कुचकुम्भयुग्मे।

एकं युधिष्ठिर धनञ्जययोश्च भाग-

मेकं समीरणसुतस्य च संविभेजे॥

6. रघुवंशमहाकाव्यमाश्रित्य 'उपमा कालिदासस्य' इत्युक्तिं स्वगिरा संसाधयत।

**अथवा**

किरातार्जुनीये भारविणा प्रदर्शितं काव्यसौष्ठवं सोदाहरणं निरूपयत।

7. अधस्तनस्य पद्यस्य सविस्तरं भावार्थः प्रदर्शनीयः—

विधाय तस्यापचितिं प्रसेदुषः,

प्रकाममप्रीयत यज्वनां प्रियः।

गृहीतुमार्यान् परिचर्यया मुहु-

र्महानुभावा हि नितान्तमर्थिनः॥

**अथवा**

रणेषु तस्य प्रहिताः प्रचेतसा,

सरोषहुङ्कार पराङ्मुखीकृताः।

प्रहर्तुरेवोरगराजरज्जवो-

जवेन कण्ठं सभयाः प्रपेदिरे॥

8. निम्नाङ्कितस्य श्लोकस्य सप्रसङ्गं व्याख्या कार्या—

यात्रासु दिक्पालपुरीं विलुण्ठ्य

न दिग्गजान् केवलमग्रहीद् यः।

पलायितास्ते जयसिन्धुराणां

गन्धेन सप्तच्छदबान्धवेन॥

**अथवा**

पृथ्वीपतेः सन्ति न यस्य पार्श्वे,

कवीश्वरास्तस्य कुतो यशांसि।

भूपाः कियन्तो न बभूवुरुर्व्यां,

जानाति नामापि न कोऽपि तेषाम्॥

**खण्ड–स**

**नोट** :– अस्मिन् खण्डे चत्वारः प्रश्नाः सन्ति। तेषु कौचिद् **द्वौ** प्रश्नौ उत्तरणीयौ (**500** शब्देषु)।

9. शिशुपालवधमाधारीकृत्य श्रीकृष्णनारदयोः मिथ संवादं स्वगिरा विवेचयत।

10. नैषधीयचरितस्य प्रथमसर्गमाश्रित्य नलहस्तगतस्य हंसस्य मनोदशां प्रदर्शयत।

11. विक्रमाङ्कदेवचरितस्य प्रथमसर्गस्य कथासारं निरूपयत।

12. रघुवंशमहाकाव्योक्तदिशा राजधर्मं विवेचयत।